1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीगणेशाय नमः श्रीसरस्वत्यै नमः धृतराष्ट्र उवाच धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मामकाः पाण्डवाश्चै
व किमकुर्वत संजय १ संजय उवाच दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा वच
नमब्रवीत् २ पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३ अत्र शू
ब्या० राः महेष्वासाः भीमार्जुनसमा युधि युयुधानो विराटश्च द्रुपदश्च महारथाः ४ धृष्टकेतुश्चेकितानः का
शिराजश्च वीर्यवान् पुरुजित् कुन्तिभोजश्च शैब्यश्च नरपुंगवः ५ युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्
॥१॥ सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम नायका मम सैन्यस्य
संज्ञार्थं तान्ब्रवीमि ते ७ [illegible] भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः ॥१॥
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ८ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः नानाशस्त्रप्रहरणाः
सर्वे युद्धविशारदाः ९ अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् १०॥
अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ११ तस्य संजनयन्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

राष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३ संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्म
ध्ये स्थापयित्वा रथोत्तमम् २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् उवाच पार्थ पश्यैतान्स
मवेतान्कुरूनिति २५ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रा
न्सखींस्तथा २६ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थि
तान् २७ कृपया परयाविष्टो विषीदन्निदमब्रवीत् अर्जुन उवाच दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थि ॥२॥
तम् सीदन्ति मम गात्राणि मुखं च परिशुष्यति २८ वेपथुश्च शरीरे मे रोमहर्षश्च जायते गांडीवं स्रंसते ह
स्तात्त्वक्चैव परिदह्यते २९ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः निमित्तानि च पश्यामि विपरीतानि
केशव ३० न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ३१ किं नो
राज्येन गोविन्द किं भोगैर्जीवितेन वा येषामर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ३२ त इमेऽवस्थिता
युद्धे प्राणांस्त्यक्त्वा धनानि च आचार्याः पितरः पुत्रास्तथैव च पितामहाः ३३ मातुलाः श्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ततः शंखाश्च भेर्यश्च प
णवानकगोमुखाः सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ
माधवः पाण्डवश्चैव दिव्यौ शंखौ प्रदध्मतुः १४॥ पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशं
खं भीमकर्मा वृकोदरः १५॥ अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोषमणि
रवं ५ पुष्पकौ १६ काश्यश्च परमेष्वासः शिखण्डी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः १७
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक् पृथक् ॥ १८॥
स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९ अ
थ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः २० हृषीकेशं तदा
वाक्यमिदमाह महीपते सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत २१ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थि
तान् कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे २२ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः धार्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अहो बत महत्पापं कर्तुं व्यवसिता वयम् यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ४६ यदि
मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ४५ संजय उवाच
एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमानसः ४६
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषा
॥३॥ दो नाम प्रथमोऽध्यायः १ संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं वि ॥३॥
षीदन्तमिदं वाक्यमुवाच मधुसूदनः १ श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे समुप
स्थितम् अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन २॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं
3 हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ३॥ अर्जुन उवाच कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन इषुभिः
प्रतियोत्स्यामि पूजार्हावरिसूदन ४॥ गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुराः पौत्राः श्यालाः संबंधिनस्तथा एतान्न हंतुमिच्छामि घ्नतोऽपि मधुसूदनः ३४ [illegible]

[illegible] अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते निहत्य धार्तराष्ट्रान्नः का प्री

तिः स्या[illegible] स्याज्जनार्दन ३५ पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः तस्मान्नार्हा वयं हंतुं धार्तराष्ट्रा

न्स्वबां[illegible]धवान् ३६ [illegible] स्वजनं हि कथं हत्वा [illegible] सुखिनः स्याम माधव ॥३७॥ यद्यप्येते न पश्यं

ति लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ३८ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्ति

तुम् कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ३९ कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः धर्मे नष्टे कुलं

कृत्स्नमधर्मोऽभिभवत्युत ४० अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते व

र्णसंकरः ॥४१॥ संकरो नर[illegible]कायैव कुलघ्नानां कुलस्य च पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ॥४२

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥४३॥ उत्स

न्नकुलधर्माणां मनुष्याणां जनार्दन नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४४॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्तितिक्षस्व भारत १४ यंहिनव्यथयन्त्येते पुरुषंपुरुषर्षभः समदुःखसुखंधीरं सोऽमृतत्वायकल्पते॥१५॥
नाऽसतो विद्यते भावो नाभावो विद्यते सतः उभयोरपिदृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिः १६॥ अविना
५ शितुतद्विद्धि येन सर्वमिदंततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७॥ अंतवंतइमे देहानि
त्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८॥ यएनं वेत्तिहंतारं यश्चैनंमन्यते
॥५॥ हतम् उभौतौनविजानीतो नायं हंति नहन्यते १९ नजायते म्रियते वा कदाचिन्नायंभूत्वाभविता वा नभूयः
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे २० वेदाविनाशिनंनित्यंयएनमजमव्ययम् कथं ॥५॥
सपुरुषः पार्थ कंघातयतिहंतिकम्२१॥ वासांसिजीर्णानियथाविहायनवानिगृह्णाति नरोऽपराणि तथा श
रीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही२२॥ नैनंछिंदंतिशस्त्राणि नैनंदहतिपावकः नचैनंक्ले
दयंत्यापो नशोषयतिमारुतः २३॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यएवच नित्यःसर्वगतःस्थाणु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हत्वार्थकामांस्तु गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान्॥५॥ न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः यानेव हत्वा न जि कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसं
मूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥७॥ नहि प्रपश्यामि
ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधि
पत्यम् ८ संजय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह
तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः १० श्री भगवानुवाच अशो
च्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ११॥ न त्वेवाहं जातु नासं
न त्वं नेमे जनाधिपाः न चैव न भविष्यामः सर्वे वयमतः परम्॥१२॥ देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्तिति॥१३॥

अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसिततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ३३ अकीर्तिंचापिभूतानिकथयिष्य
न्तितेऽव्ययाम् [illegible] संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ३४ भयाद्रणादुप
रतंमंस्यंतेत्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवम् ३५ ॥ अवाच्यवादांश्चबहून्वदिष्यंतितवा
हिताः निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिम् ३६ ॥ हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीम्
॥५॥ तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ३७ ॥ सुखदुःखेसमेकृत्वालाभालाभौजयाजयौततोयुद्धाययुज्य
स्वनैवंपापमवाप्स्यसि ३८ एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणु बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ३९ ॥५॥
नेहाभिक्रमनाशोऽस्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ४० ॥ व्यवसायात्मिका
बुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनाम् ४१ ॥ यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः
वेदवादरताःपार्थनान्यदस्तीतिवादिनः ४२ ॥ कामात्मानःस्वर्गपराःजन्मकर्मफलप्रदाम् क्रियाविशेष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रचलोऽयं सनातनः २४।। अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितु
मर्हसि २५।। अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैनं शोचितुमर्हसि २६ जा
तस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७।। अव्यक्तादीनि भूतानि
व्यक्तमध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेवना २८।। आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्य
वद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् २९।। देही नित्यमवध्यो
ऽयं देहे सर्वस्य भारत तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ३०।। स्वधर्ममपि चावेक्ष्य न विकंपितुम
र्हसि धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ३१।। यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् सुखिनः
क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ३२।।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

केशवस्थितधीः किंप्रभाषेत किमासीत व्रजेत किम् ॥५४॥ श्रीभगवानुवाच प्रजहाति यदा कामान् सर्वान् पा
र्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ५५ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतराग
6 भयक्रोधः स्थितधीर्मुनिरुच्यते ५६॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा
प्रतिष्ठिता ॥५७॥ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥ विषया
॥६॥ विनिवर्तन्ते निराहारस्य देहिनः रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥ यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ६०॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येन्द्रियाणि
तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥ ध्यायतो विषयान् पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रो
धोऽभिजायते ६२॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिना
शात्प्रणश्यति ६३ रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्‌ । व्यवसायात्मिका बुद्धिः समाधौ
न विधीयते ॥ ४४ ॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन । निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्‌ ॥ ४५
यावानर्थ उदपाने सर्वतः संप्लुतोदके । तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ ॥ कर्मण्येवाधिकारस्ते मा फलेषु
कदाचन । मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥ ४७ ॥ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सि
द्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८ ॥ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय । बुद्धौ शरणमन्विच्छ कृ
पणाः फलहेतवः ४९ ॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्‌ ५०
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबंधविनिर्मुक्ताः पदं गच्छन्त्यनामयम्‌ ५१ ॥ यदा ते मोह
कलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ ॥ श्रुतिविप्रतिपन्ना ते यदा स्था
स्या स्यति निश्चला । समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥ अर्जुन उवाच । स्थितप्रज्ञस्य का भाषा समाधिस्थस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६॥ यस्त्विन्द्रियाणि मनसा
नियम्यारभतेऽर्जुन कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥७॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रा
7 ऽपि च ते न प्रसिद्ध्येदकर्मणः ॥८॥ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः तदर्थं कर्म कौन्तेय मुक्तसंगः समाचर ॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥१०॥ देवान्भावयतानेन ते देवा
भावयंतु वः परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥११॥ इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः
१॥ तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥१२॥ यज्ञशिष्टाशिनः संतो मुच्यन्ते सर्वकिल्बिषैः भुंजते ते त्वघं पापा ये पचं ॥७॥
त्यात्मकारणात् ॥१३॥ अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥१४॥ कर्म
ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥१५॥ एवं प्रवर्तितं चक्रं नानुवर्त
यतीह यः अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥१६॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च
संतुष्टस्तस्य कार्यं न विद्यते ॥१७॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥
तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥१९॥ कर्मणैव हि संसिद्धि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी० १

व॥ प्रसवदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना
न चाभावयतः शांतिरशांतस्य कुतः सुखम् ॥६६॥ इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवां
भसि ॥६७॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥ या निशा सर्वभूता
नां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति य
द्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ॥७०॥ विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः
का ५ निर्ममो निरहंकारः स शांतिमधिगच्छति ॥७१॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतका
लेऽपि ब्रह्मनिर्वाणमृच्छति ॥७२॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्य
योगो नाम द्वितीयोऽध्यायः ॥२॥ ❁ अर्जुन उवाच ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियो
जयसि केशव ॥१॥ व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥२॥ श्रीभग
वानुवाच लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥३॥ न कर्म
णामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति ॥४॥ नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥५॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्थिताजनकादयः लोकसंग्रहमेवापिसंपश्यन्कर्त्तुमर्हसि २०॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः स य
त्प्रमाणंकुरुते लोकस्तदनुवर्त्तते २१॥ नमे पार्थास्ति कर्त्तव्यं त्रिषुलोकेषुकिंचन, नानवाप्तमवाप्तव्यं वर्त्तएवच
कर्मणि २२॥ यदिह्यहंनवर्त्तेयंजातुकर्मण्यतंद्रितः ममवर्त्मानुवर्त्तंतेमनुष्याः पार्थ सर्वशः २३॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham